# sanatsujAtIyam

# સનત્સુજાતીયમ્

## Document Information

Text title : Sanatsujatiya

File name : sanatsujAtIya.itx

Category : major_works, vyAsa

Location : doc_z_misc_major_works

Author : Veda Vyasa

Description-comments : From Mahabharat Udyogaparva (5) adhyAya 41-46 (BORI ediion 41-45)

Latest update : January 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સનત્સુજાતીયમ્

## ઉદ્યોગપર્વ - અધ્યાય ૦૪૧

॥ શ્રીઃ ॥

૫.૪૧ । અધ્યાયઃ ૪૧

ધૃતરાષ્ટ્રેણ પુનર્ધર્મરહસ્યકથનં ચોદિતેન વિદુરેણ સ્વસ્ય શૂદ્રયોનિજાતત્વેન તત્કથનાનૌચિત્યકથનમ્ ॥ ૧ ॥

તથા સ્મરણ માત્રસંનિહિતં સનત્સુજાતંપ્રતિ ધૃતરાષ્ટ્રાય તત્વોપદેશપ્રાર્થના ॥ ૨ ॥

ધૃતરાષ્ટ્ર ઉવાચ ।
અનુક્તં યદિ તે કિઞ્ચિદ્વાચા વિદુર વિદ્યતે ।
તન્મે શુશ્રૂષતો બ્રૂહિ વિચિત્રાણિ હિ ભાષસે ॥ ૪૧-૧
વિદુર ઉવાચ ।
ધૃતરાષ્ટ્ર કુમારો વૈ યઃ પુરાણઃ સનાતનઃ ।
તનત્સુજાતઃ પ્રોવાચ મૃત્યુર્નાસ્તીતિ ભારત ॥ ૪૧-૨
સ તે ગુહ્યાન્પ્રકાશાંશ્ચ સર્વાન્હૃદયસંશ્રયાન્ ।
પ્રવક્ષ્યતિ મહારાજ સર્વબુદ્ધિમતાં વરઃ ॥ ૪૧-૩
ધૃતરાષ્ટ્ર ઉવાચ ।
કિં ત્વં ન વેદ તદ્ભૂયો યન્મે બ્રૂયાત્સનાતનઃ ।
ત્વમેવ વિદુર બ્રૂહિ પ્રજ્ઞાશેષોઽસ્તિ ચેત્તવ ॥ ૪૧-૪
વિદુર ઉવાચ ।
શૂદ્રયોનાવહં જાતો નાતોઽન્યદ્વક્તુમુત્સહે ।
કુમારસ્ય તુ યાબુદ્ધિર્વેદ તાં શાશ્વતીમહમ્ ॥ ૪૧-૫
બ્રાહ્મીં હિ યોનિમાપન્નઃ સગુહ્યમપિ યો વદેત્ ।
ન તેન ગર્હ્યો દેવાનાં તસ્માદેતદ્બ્રવીમિ તે ॥ ૪૧-૬

ધૃતરાષ્ટ્ર ઉવાચ ।
બ્રવીહિ વિદુર ત્વં મે પુરાણં તં સનાતનમ્ ।
કથમેતેન દેહેન સ્યાદિહૈવ સમાગમઃ ॥ ૪૧-૭
વૈશમ્પાયન ઉવાચ ।
ચિન્તયામાસ વિદુરસ્તમૃષિં શંસિતવ્રતમ્ ।
સ ચ તચ્ચિન્તિતં જ્ઞાત્વા દર્શયામાસ ભારત ॥ ૪૧-૮
સ ચૈનં પ્રતિજગ્રાહ વિધિદૃષ્ટેન કર્મણા ।
સુખોપવિષ્ટં વિશ્રાન્તમથૈનં વિદુરોઽબ્રવીત્ ॥ ૪૧-૯
ભગવન્સંશયઃ કશ્ચિદ્ધૃતરાષ્ટ્રસ્ય માનસઃ ।
યો ન શક્યો મયા વક્તું ત્વમસ્મૈ વક્તુમર્હસિ ॥ ૪૧-૧૦
યં શ્રુત્વાઽયં મનુષ્યેન્દ્રઃ સર્વદુઃખાતિગો ભવેત્ ॥ ૪૧-૧૧
લાભાલાભૌ પ્રિયદ્વેષ્યૌ યથૈનં ન જરાન્તકૌ ।
વિષહેરન્ભયામર્ષૌ ક્ષુત્પિપાસે મદોદ્ભવૌ ।
અરતિશ્ચૈવ તન્દ્રી ચ કામક્રોધૌ ક્ષયોદયૌ ॥ ૪૧-૧૨

ઇતિ શ્રીમન્મહાભારતે ઉદ્યોગપર્વણિ સનત્સુજાતપર્વણિ
એકચત્વારિંશોઽધ્યાયઃ ॥

## ઉદ્યોગપર્વ - અધ્યાય ૦૪૨

॥ શ્રીઃ ॥

૫.૪૨ । અધ્યાયઃ ૪૨

સનત્સુજાતેન ધૃતરાષ્ટ્રંપ્રતિ તત્ત્વોપદેશઃ ॥ ૧ ॥

વૈશમ્પાયન ઉવાચ ।
તતો રાજા ધૃતરાષ્ટ્રો મનીષી
સંપૂજ્ય વાક્યં વિદુરેરિતં તત્ ।
સનત્સુજાતં રહિતે મહાત્મા
પપ્રચ્છ બુદ્ધિં પરમાં બુભૂષન્ ॥ ૪૨-૧
ધૃતરાષ્ટ્ર ઉવાચ ।
સનત્સુજાત યદિમં શૃણોમિ
ન મૃત્યુરસ્તીતિ તવોપદેશમ્ ।
દેવાસુરા હ્યાચરન્બ્રહ્મચર્ય-

મમૃત્યવે તત્કતરન્નુ સત્યમ્ ॥ ૪૨-૨
સનત્સુજાત ઉવાચ ।
અમૃત્યું કર્મણા કેચિન્મૃત્યુર્નાસ્તીતિ ચાપરે ।
શૃણુ મે બ્રુવતો રાજન્યથૈતન્મા વિશઙ્કિથાઃ ॥ ૪૨-૩
ઉભે સત્યે ક્ષત્રિયાદ્ય પ્રવૃત્તે
મોહો મૃત્યુઃ સંમતોઽયં કવીનામ્ ।
પ્રમાદં વૈ મૃત્યુમહં બ્રવીમિ
તથાઽપ્રમાદમમૃતત્વં બ્રવીમિ ॥ ૪૨-૪
પ્રમાદાદ્વૈ અસુરાઃ પરાભવ-
ન્નપ્રમાદાદ્બ્રહ્મભૂતાઃ સુરાશ્ચ ।
નૈવ મૃત્યુર્વ્યાઘ્ર ઇવાત્તિ જન્તૂ-
ન્ન હ્યસ્ય રૂપમુપલભ્યતે હિ ॥ ૪૨-૫
યમં ત્વેકે મૃત્યુમતોઽન્યમાહુ-
રાત્માવાસમમૃતં બ્રહ્મચર્યમ્ ।
પિતૃલોકે રાજ્યમનુશાસ્તિ દેવઃ
શિવઃ શિવાનામશિવોઽશિવાનામ્ ॥ ૪૨-૬
અસ્યાદેશાન્નિઃસરતે નરાણાં
ક્રોધઃ પ્રમાદો લોભરૂપશ્ચ મૃત્યુઃ ।
અહં ગતેનૈવ ચરન્વિમાર્ગા-
ન્ન ચાત્મનો યોગમુપૈતિ કશ્ચિત્ ॥ ૪૨-૭
તે મોહિતાસ્તદ્વશે વર્તમાના
ઇતઃ પ્રેતાસ્તત્ર પુનઃ પતન્તિ ।
તતસ્તાન્દેવા અનુવિપ્લવન્તે
અતો મૃત્યુર્મરણાદભ્યુપૈતિ ॥ ૪૨-૮
કર્મોદયે કર્મફલાનુરાગા-
સ્તત્રાનુ તે યાન્તિ ન તરન્તિ મૃત્યુમ્ ।
સદર્થયોગાનવગમાત્સમન્તા-
ત્પ્રવર્તતે ભોગભોગેન દેહી ॥ ૪૨-૯
તદ્વૈ મહામોહનમિન્દ્રિયાણાં
મિથ્યાર્થયોગસ્ય ગતિર્હિ નિત્યા ।
મિથ્યાર્થયોગાભિહતાન્તરાત્મા
સ્મરન્નુપાસ્તે વિષયાન્સમન્તાત્ ॥ ૪૨-૧૦

અભિધ્યા વૈ પ્રથમં હન્તિ લોકાન્
કામક્રોધાવનુગૃહ્યાશુ પશ્ચાત્ ।
એતે બાલાન્મૃત્યવે પ્રાપયન્તિ
ધીરાસ્તુ ધૈર્યેણ તરન્તિ મૃત્યુમ્ ॥ ૪૨-૧૧
સોઽભિધ્યાયન્નુત્પતિષ્ણન્નિહન્યા-
દનાદરેણાપ્રતિબુધ્યમાનઃ ।
નૈનં મૃત્યુર્મૃત્યુરિવાત્તિ ભૂત્વા
એવં વિદ્વાન્યો વિનિહન્તિ કામાન્ ॥ ૪૨-૧૨
કામાનુસારી પુરુષઃ કામાનનુ વિનશ્યતિ ।
કામાન્વ્યુદસ્ય ધુનુતે યત્કિઞ્ચિત્પુરુષો રજઃ ॥ ૪૨-૧૩
તમોપ્રકાશો ભૂતાનાં નરકોઽયં પ્રદૃશ્યતે ।
મુહ્યન્ત ઇવ ધાવન્તિ ગચ્છન્તઃ શ્વભ્રમુન્મુખાઃ ॥ ૪૨-૧૪
અમૂઢવૃત્તેઃ પુરુષસ્યેહ કુર્યા-
ત્કિં વૈ મૃત્યુસ્તાર્ણ ઇવાસ્ય વ્યાઘ્રઃ ।
અમન્યમાનઃ ક્ષત્રિય કિઞ્ચિદન્ય-
ન્નાધીયતે તાર્ણ ઇવાસ્ય સર્પઃ ॥ ૪૨-૧૫
ક્રોધાલ્લોભાન્મોહભયાન્તરાત્મા
સ વૈ મૃત્યુસ્ત્વચ્છરિરે ય એષઃ ।
એવં મૃત્યું જાયમાનં વિદિત્વા
જ્ઞાને તિષ્ઠન્ન બિભેતીહ મૃત્યોઃ ।
વિનશ્યતે વિષયે તસ્ય મૃત્યુ-
ર્મૃત્યોર્યથા વિષયં પ્રાપ્ય મર્ત્યઃ ॥ ૪૨-૧૬
ધૃતરાષ્ટ્ર ઉવાચ ।
યાનેવાહુરિજ્યયા સાધુલોકાન્
દ્વિજાતીનાં પુણ્યતમાન્સનાતનાત્ ।
તેષાં પરાર્થં કથયન્તીહ વેદા
એતદ્વિદ્વાન્નૈતિ કથં નુ કર્મ ॥ ૪૨-૧૭
સનત્સુજાત ઉવાચ ।
એવં હ્યવિદ્વાનુપયાતિ તત્ર
તત્રાર્થજાતં ચ વદન્તિ વેદાઃ ।
સવેહ આયાતિ પરં પરાત્મા
પ્રયાતિ માર્ગેણ નિહત્ય માર્ગાન્ ॥ ૪૨-૧૮

ધૃતરાષ્ટ્ર ઉવાચ ।
કોઽસૌ નિયુઙ્ક્તે તમજં પુરાણં
સ ચેદિદં સર્વમનુક્રમેણ ।
કિં વાસ્ય કાર્યમથવા સુખં ચ
તન્મે વિદ્વન્બ્રૂહિ સર્વં યથાવત્ ॥ ૪૨-૧૯
સનત્સુજાત ઉવાચ ।
દોષો મહાનત્ર વિભેદયોગે
હ્યનાદિયોગેન ભવન્તિ નિત્યાઃ ।
તથાસ્ય નાધિક્યમપૈતિ કિઞ્ચિ-
દનાદિયોગેન ભવન્તિ પુંસઃ ॥ ૪૨-૨૦
ય એતદ્વા ભગવાન્સ નિત્યો
વિકારયોગેન કરોતિ વિશ્વમ્ ।
તથાચ તચ્છક્તિરિતિ સ્મ મન્યતે
તથાર્થયોગેન ભવન્તિ વેદાઃ ॥ ૪૨-૨૧
ધૃતરાષ્ટ્ર ઉવાચ ।
યસ્માદ્ધર્માન્નાચરન્તીહ કેચિ-
ત્તથા ધર્માન્કેચિદિહાચરન્તિ ।
ધર્મઃ પાપેન પ્રતિહન્યતે સ્વિ-
દુતાહો ધર્મઃ પ્રતિહન્તિ પાપમ્ ॥ ૪૨-૨૨
સનત્સુજાત ઉવાચ ।
તસ્મિન્સ્થિતૌ વાપ્યુભયં હિ નિત્યં
જ્ઞાનેન વિદ્વાન્પ્રતિહન્તિ સિદ્ધમ્ ।
તથાન્યથા પુણ્યમુપૈતિ દેહી
તથાગતં પાપમુપૈતિ સિદ્ધમ્ ॥ ૪૨-૨૩
ગત્વોભયં કર્મણા યુજ્યતે સ્થિરં
શુભસ્ય પાપસ્ય સ ચાપિ કર્મણા ।
ધર્મેણ પાપં પ્રણુદતીહ વિદ્વાન્
ધર્મો બલીયાનિતિ તત્ર વિદ્ધિઃ ॥ ૪૨-૨૪
ધૃતરાષ્ટ્ર ઉવાચ ।
યાનિહાહુઃ સ્વસ્ય ધર્મસ્ય લોકા-
ન્દ્વિજાતીનાં પુણ્યકૃતાં સનાતનાન્ ।
તેષાં ક્રમાન્કથય તતોઽપિ ચાન્યા-

ન્નૈતદ્વિદ્વન્વેત્તુમિચ્છામિ કર્મ ॥ ૪૨-૨૫
સનત્સુજાત ઉવાચ ।
યેષાં વ્રતેઽથ વિસ્પર્ધા બલે બલવતામિવ ।
તે બ્રાહ્મણા ઇતઃ પ્રેત્ય સ્વર્ગે યાન્તિ પ્રકાશતામ્ ॥ ૪૨-૨૬
યેષાં ધર્મે ચ વિસ્પર્ધા તેષાં જજ્ઞાનસાધનમ્ ।
તે બ્રાહ્મણા ઇતો મુક્તાઃ સ્વર્ગં યાન્તિ ત્રિવિષ્ટપમ્ ॥ ૪૨-૨૭
તસ્ય સમ્યક્સમાચારમાહુર્વેદવિદો જનાઃ ।
નૈનં મન્યેત ભૂયિષ્ઠં બાહ્યમાભ્યન્તરં જનમ્ ॥ ૪૨-૨૮
યત્ર મન્યેત ભૂયિષ્ઠં પ્રાવૃષીવ તૃણોદકમ્ ।
અન્નં પાનં બ્રાહ્મણસ્ય તજ્જીવોન્નાનુસંજ્વરેત્ ॥ ૪૨-૨૯
યત્રાકથયમાનસ્ય પ્રયચ્છત્યશિવં ભયમ્ ।
અતિરિક્તમિવાકુર્વન્સ શ્રેયાન્નેતરો જનઃ ॥ ૪૨-૩૦
યો વા કથયમાનસ્ય હ્યાત્માનં નાનુસંજ્વરેત્ ।
બ્રહ્મસ્વં નોપભુઞ્જીત તદન્નં સંમતં સતામ્ ।
કુશવલ્કલચેલાદ્યં બ્રહ્મસ્વં યોગિનો વિદુઃ ॥ ૪૨-૩૧
યથા ખં વાન્તમશ્નાતિ શ્વા વૈ નિત્યમભૂતયે ।
એવં તે વાન્તમશ્નન્તિ સ્વવીર્યસ્યોપસેવનાત્ ॥ ૪૨-૩૨
નિત્યમજ્ઞાતચર્યા મે ઇતિ મન્યેત બ્રાહ્મણઃ ।
જ્ઞાતીનાં તુ વસન્મધ્યે નૈવં વિન્દેત કિઞ્ચન ॥ ૪૨-૩૩
કોહ્યેવમન્તરાત્માનં બ્રાહ્મણો હન્તુમર્હતિ ।
નિર્લિઙ્ગમચલં શુદ્ધં સર્વદ્વન્દ્વવિવર્જિતમ્ ॥ ૪૨-૩૪
યોઽન્યથા સન્તમાત્માનમન્યથા પ્રતિપદ્યતે ।
કિં તેન ન કૃતં પાપં ચોરેણાત્માપહારિણા ॥ ૪૨-૩૫
અશ્રાન્તઃ સ્યાદનાદાતા સંમતો નિરુપદ્રવઃ ।
શિષ્ટો ન શિષ્ટવત્સ સ્યાદ્બ્રાહ્મણો બ્રહ્મવિત્કવિઃ ॥ ૪૨-૩૬
અનાઢ્યા માનુષે વિત્તે આઢ્યા દૈવે તથા ક્રતૌ ।
તે દુર્ધર્ષા દુષ્પ્રકમ્પ્યાસ્તાન્વિદ્યાદ્બ્રહ્મણસ્તનુમ્ ॥ ૪૨-૩૭
સર્વાન્ખિષ્ટકૃતો દેવાન્વિદ્યાદ્ય ઇહ કશ્ચન ।
ન સ માનો બ્રાહ્મણસ્ય તસ્મિન્પ્રયતતે સ્વયમ્ ॥ ૪૨-૩૮
યમપ્રયતમાનં તુ માનયન્તિ સમાહિતાઃ ।
ન માન્યમાનો મન્યેત નાવમાનેઽતિસંજ્વરેત્ ॥ ૪૨-૩૯
લોકઃ સ્વભાવવૃત્તિર્હિ નિમેષોન્મષવત્સદા ।

વિદ્વાંસો માનયન્તીહ ઇતિ મન્યેત માનિતઃ ॥ ૪૨-૪૦
અધર્મનિપુણા મુઢા લોકે માયાવિશારદાઃ ।
ન માન્યં માનયિષ્યન્તિ એવં મન્યેત માનિતઃ ॥ ૪૨-૪૧
ન વૈ માનં ચ મૌનં ચ સહિતૌ વસતઃ સદા ।
અયં હિ લોકો માનસ્ય અસૌ મૌનસ્ય તદ્વિદુઃ ॥ ૪૨-૪૨
શ્રીર્હિ માનાર્થસંવાસા સા ચાપિ પરિપન્થિની ।
બ્રાહ્મી સુદુર્લભા શ્રીર્હિ પ્રજ્ઞાહીનેન ક્ષત્રિય ॥ ૪૨-૪૩
દ્વારાણિ તસ્યેહ વદન્તિ સન્તો
બહુપ્રકારાણિ દુરાધરાણિ ।
સત્યાર્જવે હ્રીર્દમશૌચવિદ્યા
ષણ્માનમોહપ્રતિબન્ધનાનિ ॥ ૪૨-૪૪

ઇતિ શ્રીમન્મહાભારતે ઉદ્યોગપર્વણિ સનત્સુજાતપર્વણિ
દ્વિચત્વારિંશોઽધ્યાયઃ ॥

## ઉદ્યોગપર્વ - અધ્યાય ૦૪૩

॥ શ્રીઃ ॥

૫.૪૩ । અધ્યાયઃ ૪૩

સનત્સુજાતેન ધૃતરાષ્ટ્રંપ્રતિ તત્ત્વોપદેશઃ ॥ ૧ ॥

ધૃતરાષ્ટ્ર ઉવાચ ।
કસ્યૈષ મૌનઃ કતરન્નુ મૌનં
પ્રબ્રૂહિ વિદ્વન્નિહ મૌનભાવમ્ ।
મૌનેન વિદ્વાનુત યાતિ મૌનં
કથં મુને મૌનમિહાચરન્તિ ॥ ૪૩-૧
સનત્સુજાત ઉવાચ ।
યતો ન વેદા મનસા સહૈન-
મનુપ્રવિશન્તિ તતોઽથ મૌનમ્ ।
યત્રોત્થિતો વેદશબ્દસ્તથાયં
સ તન્મયત્વેન વિભાતિ રાજન્ ॥ ૪૩-૨
ધૃતરાષ્ટ્ર ઉવાચ ।
ઋચો યજૂંષિ યો વેદ સામવેદં ચ વેદ યઃ ।

પાપાનિ કુર્વન્પાપેન લિપ્યતે કિં ન લિપ્યતે ॥ ૪૩-૩
સનત્સુજાત ઉવાચ ।
નૈનં સામાન્યૃચો વાપિ ન યજૂંષ્યવિચક્ષણમ્ ।
ત્રાયન્તે કર્મણઃ પાપાન્ન તે મિથ્યા બ્રવીમ્યહમ્ ॥ ૪૩-૪
ન ચ્છન્દાંસિ વૃજિનાત્તારયન્તિ
માયાવિનં માયયા સર્વમાનમ્ ।
નીડં શકુન્તા ઇવ જાતપક્ષા-
શ્છન્દાંસ્યેનં પ્રજહત્યન્તકાલે ॥ ૪૩-૫
ધૃતરાષ્ટ્ર ઉવાચ ।
ન ચેદ્વેદા વેદવિદં ત્રાતું શક્તા વિચક્ષણ ।
અથ કસ્માત્પ્રલાપોઽયં બ્રાહ્મણાનાં સનાતનઃ ॥ ૪૩-૬
સનત્સુજાત ઉવાચ ।
તસ્યૈવ નામાદિવિશેષરૂપૈ-
રિદં જગદ્ભાતિ મહાનુભાવ ।
નિર્દિશ્ય સમ્યક્પ્રવદન્તિ વેદા-
સ્તદ્વિશ્વવૈરૂપ્યમુદાહરન્તિ ॥ ૪૩-૭
તદર્થયુક્તં તપ એતદિજ્યા
તાભ્યામસૌ પુણ્યમુપૈતિ વિદ્વાન્ ।
પુણ્યેન પાપં વિનિહત્ય પશ્ચા-
ત્સંજાયતે જ્ઞાનવિદીપિતાત્મા ॥ ૪૩-૮
જ્ઞાનેન ચાત્માનમુપૈતિ વિદ્વા-
નથાન્યથા વર્ગફલાનુકાઙ્ક્ષી ।
અસ્મિન્કૃતં તત્પરિગૃહ્ય સર્વ-
મમુત્ર ભુઙ્ક્તે પુનરેતિ માર્ગમ્ ॥ ૪૩-૯
અસ્મિઁલ્લોકે તપસ્તપ્તં ફલમન્યત્ર ભુજ્યતે ।
બ્રાહ્મણાનામિમે લોકા વૃદ્ધે તપસિ સંયતાઃ ॥ ૪૩-૧૦
‘ બ્રાહ્મણાનાં તપઃ સ્વૃદ્ધમન્યેષાં તાવદેવ તત્ ।
એતત્સમૃદ્ધમત્યૃદ્ધં તપો ભવતિ કેવલમ્ ॥ ’ ૪૩-૧૧
ધૃતરાષ્ટ્ર ઉવાચ ।
કથં સમૃદ્ધમપ્યૃદ્ધં તપો ભવતિ કેવલમ્ ।
સનત્સુજાત તદ્બ્રૂહિ યથા વિદ્યામ તદ્વયમ્ ॥ ૪૩-૧૨
સનત્સુજાત ઉવાચ ।

નિષ્કલ્મષં તપસ્ત્વેતત્કેવલં પરિચક્ષતે ।
એતત્સમૃદ્ધમપ્યૃદ્ધં તપો ભવતિ કેવલમ્ ॥ ૪૩-૧૩
તપોમૂલમિદં સર્વં યન્માં પૃચ્છસિ ક્ષત્રિય ।
તપસા વેદવિદ્વાંસઃ પરં ત્વમૃતમાપ્નુયુઃ ॥ ૪૩-૧૪
ધૃતરાષ્ટ્ર ઉવાચ ।
કલ્મષં તપસો બ્રૂહિ શ્રુતં નિષ્કલ્મષં તપઃ ।
સનત્સુજાત યેનેદં વિદ્યાં ગુહ્યં સનાતનમ્ ॥ ૪૩-૧૫
સનત્સુજાત ઉવાચ ।
ક્રોધાદયો દ્વાદશ યસ્ય દોષા-
સ્તથા નૃશંસાનિ દશ ત્રિ રાજન્ ।
ધર્માદયો દ્વાદશૈતે પિતૃણાં
શાસ્ત્રે ગુણા યે વિદિતા દ્વિજાનામ્ ॥ ૪૩-૧૬
ક્રોધઃ કામો લોભમોહૌ વિધિત્સા-
ऽકૃપાऽસૂયે માનશોકૌ સ્પૃહા ચ ।
ઈર્ષ્યા જુગુપ્સા ચ મનુષ્યદોષા
વર્જ્યાઃ સદા દ્વાદશૈતે નરાણામ્ ॥ ૪૩-૧૭
એકૈકમેતે રાજેન્દ્ર મનુષ્યાન્પર્યુપાસતે ।
લિપ્સમાનોન્તરં તેષાં મૃગાણામિવ લુબ્ધકઃ ॥ ૪૩-૧૮
વિકત્થનઃ સ્પૃહયાલુર્મનસ્વી
બિભ્રત્કોપં ચપલો રોષણશ્ચ ।
એતાન્પાપાઃ ષણ્ણરાઃ પાપધર્માન્
પ્રકુર્વતે નો ત્રસન્તઃ સુદુર્ગે ॥ ૪૩-૧૯
સંભોગસંવિદ્વિષમોऽતિમાની
દત્તાનુતાપી કૃપણો બલીયાન્ ।
વર્ગપ્રશંસી વનિતાસુ દ્વેષ્ટા
એતે પરે સપ્ત નૃશંસવર્ગાઃ ॥ ૪૩-૨૦
ધર્મશ્ચ સત્યં ચ દમસ્તપશ્ચ
આમાત્સર્યં હ્રીસ્તિતિક્ષાનસૂયા ।
યજ્ઞશ્ચ દાનં ચ ધૃતિઃ શ્રુતં ચ
વ્રતાનિ વૈ દ્વાદશ બ્રાહ્મણસ્ય ॥ ૪૩-૨૧
યસ્ત્વેતેભ્યઃ પ્રભવેદ્દ્વાદશભ્યઃ
સર્વામપીમાં પૃથિવીં સ શિષ્યાત્ ।

ત્રિભિર્દ્વાભ્યામેકતો વાર્થિતો ય-
સ્તસ્ય સ્વમસ્તીતિ સ વેદિતવ્યઃ ॥ ૪૩-૨૨
દમસ્ત્યાગોઽપ્રમાદશ્ચ એતેષ્વમૃતમાહિતમ્ ।
તાનિ સત્યમુખાન્યાહુર્બ્રાહ્મણા યે મનીષિણઃ ॥ ૪૩-૨૩
દમોઽષ્ટાદશદોષઃ સ્યાત્પ્રાતિકૂલ્યં કૃતે ભવેત્ ।
અનૃતં ચાભ્યસૂયા ચ કામાર્થૌ ચ તથા સ્પૃહા ॥ ૪૩-૨૪
ક્રોધઃ શોકસ્તથા તૃષ્ણા લોભઃ પૈશૂન્યમેવ ચ ।
મત્સરશ્ચ વિહિંસા ચ પરિતાપસ્તથાઽરતિઃ ॥ ૪૩-૨૫
અપસ્મારશ્ચાતિવાદસ્તથા સંભાવનાત્મનિ ।
એતૈર્વિમુક્તો દોષૈર્યઃ સ દાન્તઃ સદ્ભિરુચ્યતે ॥ ૪૩-૨૬
મદોઽષ્ટાદશદોષઃ સ્યાત્ત્યાગો ભવતિ ષડ્વિધઃ ।
વિપર્યયાઃ સ્મૃતા એતે મદદોષા ઉદાહૃતાઃ ।
દોષા દમસ્ય યે પ્રોક્તાસ્તાન્દોષાન્પરિવર્જયેત્ ॥ ૪૩-૨૭
શ્રેયાંસ્તુ ષડ્વિધસ્ત્યાગસ્તૃતીયો દુષ્કરો ભવેત્ ।
તેન દુઃખં તરત્યેવ ભિન્નં તસ્મિઞ્જિતં કૃતે ॥ ૪૩-૨૮
શ્રેયાંસ્તુ ષડ્વિધસ્ત્યાગઃ શ્રિયં પ્રાપ્ય ન હૃષ્યતિ ।
ઇષ્ટાપૂર્તે દ્વિતીયં સ્યાન્નિત્યવૈરાગ્યયોગતઃ ॥ ૪૩-૨૯
કામત્યાગશ્ચ રાજેન્દ્ર સ તૃતીય ઇતિ સ્મૃતઃ ।
અપ્યવાચ્યં વદન્ત્યેતં સ તૃતીયો ગુણઃ સ્મૃતઃ ॥ ૪૩-૩૦
ત્યક્તૈર્દ્રવ્યૈર્યદ્ભવતિ નોપયુક્તૈશ્ચ કામતઃ ।
ન ચ દ્રવ્યૈસ્તદ્ભવતિ નોપયુક્તૈશ્ચ કામતઃ ॥ ૪૩-૩૧
ન ચ કર્મસ્વસિદ્ધેષુ દુઃખં તે ન ચ ન ગ્લપેત્ ।
સર્વૈરેવ ગુણૈર્યુક્તો દ્રવ્યવાનપિ યો ભવેત્ ॥ ૪૩-૩૨
અપ્રિયે ચ સમુત્પન્ને વ્યથાં જાતુ ન ગચ્છતિ ।
ઇષ્ટાન્પુત્રાંશ્ચ દારાંશ્ચ ન યાચેત કદાચન ॥ ૪૩-૩૩
અર્હતે યાચમાનાય પ્રદેયં તચ્છુભં ભવેત્ ।
અપ્રમાદી ભવેદેતૈઃ સ ચાપ્યષ્ટગુણો ભવેત્ ॥ ૪૩-૩૪
સત્યં ધ્યાનં સમાધાનં ચોદ્યં વૈરાગ્યમેવ ચ ।
અસ્તેયં બ્રહ્મચર્યં ચ તથાઽસંગ્રહમેવ ચ ॥ ૪૩-૩૫
એવં દોષા મદસ્યોક્તાસ્તાન્દોષાન્પરિવર્જયેત્ ।
તથા ત્યાગોઽપ્રમાદશ્ચ સ ચાપ્યષ્ટગુણો મતઃ ॥ ૪૩-૩૬
અષ્ટૌ દોષાઃ પ્રમાદસ્ય તાન્દોષાન્પરિવર્જયેત્ ।

ઇન્દ્રિયેભ્યશ્ચ પઞ્ચભ્યો મનસશ્ચૈવ ભારત ।
અતીતાનાગતેભ્યશ્ચ મુક્ત્યુપેતઃ સુખી ભવેત્ ॥ ૪૩-૩૭
સત્યાત્મા ભવ રાજેન્દ્ર સત્યે લોકાઃ પ્રતિષ્ઠિતાઃ ।
તાંસ્તુ સત્યમુખાનાહુઃ સત્યે હ્યમૃતમાહિતમ્ ॥ ૪૩-૩૮
નિવૃત્તેનૈવ દોષેણ તપો વ્રતમિહાચરેત્ ।
એતદ્ધાતૃકૃતં વૃત્તં સત્યમેવ સતાં વ્રતમ્ ॥ ૪૩-૩૯
દોષૈરેતૈર્વિયુક્તસ્તુ ગુણૈરેતૈઃ સમન્વિતઃ ।
એતત્સમૃદ્ધમત્યર્થં તપો ભવતિ કેવલમ્ ॥ ૪૩-૪૦
યન્માં પૃચ્છસિ રાજેન્દ્ર સંક્ષેપાત્પ્રબ્રવીમિ તે ।
એતત્પાપહરં પુણ્યં જન્મમૃત્યુજરાપહમ્ ॥ ૪૩-૪૧
ધૃતરાષ્ટ્ર ઉવાચ ।
આખ્યાનપઞ્ચમૈર્વેદૈર્ભૂયિષ્ઠં કથ્યતે જનઃ ।
તથા ચાન્યે ચતુર્વેદાસ્ત્રિવેદાશ્ચ તથા પરે ॥ ૪૩-૪૨
દ્વિવેદાશ્ચૈકવેદાશ્ચાપ્યનૃચશ્ચ તથા પરે ।
તેષાં તુ કતરઃ સ સ્યાદ્યમહં વેદ વૈ દ્વિજમ્ ॥ ૪૩-૪૩
સનત્સુજાત ઉવાચ ।
એકસ્ય વેદસ્યાજ્ઞાનાદ્વેદાસ્તે બહવઃ કૃતાઃ ।
સત્યસ્યૈકસ્ય રાજેન્દ્ર સત્યે કશ્ચિદવસ્થિતઃ ॥ ૪૩-૪૪
એવં વેદમવિજ્ઞાય પ્રાજ્ઞોઽહમિતિ મન્યતે ।
દાનમધ્યયનં યજ્ઞો લોભાદેતત્પ્રવર્તતે ॥ ૪૩-૪૫
સત્યાત્પ્રચ્યવમાનાનાં સઙ્કલ્પો વિતથો ભવેત્ ।
તતો યજ્ઞઃ પ્રતાયેત સત્યસ્યાનવધારણાત્ ॥ ૪૩-૪૬
મનસાન્યસ્ય ભવતિ વાચાન્યસ્યાથ કર્મણા ।
સઙ્કલ્પસિદ્ધઃ પુરુષઃ સઙ્કલ્પાનધિતિષ્ઠતિ ॥ ૪૩-૪૭
અનૈભૃત્યેન ચૈતસ્ય દીક્ષિતવ્રતમાચરેત્ ।
નામૈતદ્ધાતુનિર્વૃત્તં સત્યમેવ સતાં પરમ્ ॥ ૪૩-૪૮
જ્ઞાનં વૈ નામ પ્રત્યક્ષં પરોક્ષં જાયતે તપઃ ।
વિદ્યાદ્બહુ પઠન્તં તુ દ્વિજં વૈ બહુપાઠિનમ્ ॥ ૪૩-૪૯
તસ્માત્ક્ષત્રિય મા મંસ્થા જલ્પિતેનૈવ વૈ દ્વિજમ્ ।
ય એવ સત્યાન્નાપૈતિ સ જ્ઞેયો બ્રાહ્મણસ્ત્વયા ॥ ૪૩-૫૦
છન્દાંસિ નામ ક્ષત્રિય તાન્યથર્વા
પુરા જગૌ મહર્ષિસઙ્ઘ એષઃ

છન્દોવિદસ્તે ય ઉત નાધીતવેદા
ન વેદવેદ્યસ્ય વિદુર્હિ તત્ત્વમ્ ॥ ૪૩-૫૧
છન્દાંસિ નામ દ્વિપદાં વરિષ્ઠ
સ્વચ્છન્દયોગેન ભવન્તિ તત્ર ।
છન્દોવિદસ્તે ન ચ તાનધીત્ય
ગતા ન વેદસ્ય ન વેદ્યમાર્યાઃ ॥ ૪૩-૫૨
ન વેદાનાં વેદિતા કશ્ચિદસ્તિ
કશ્ચિત્ત્વેતાન્બુદ્ધ્યતે વાપિ રાજન્ ।
યો વેદ વેદાન્ન સ વેદ વેદ્યં
સત્યે સ્થિતો યસ્તુ સ વેદ વેદ્યમ્ ॥ ૪૩-૫૩
ન વેદાનાં વેદિતા કશ્ચિદસ્તિ
વેદ્યેન વેદં ન વિદુર્ન વેદ્યમ્ ।
યો વેદ વેદં સ ચ વેદ વેદ્યં
યો વેદ વેદ્યં ન સ વેદ સત્યમ્ ॥ ૪૩-૫૪
યો વેદ વેદાન્સ ચ વેદ વેદ્યં
ન તં વિદુર્વેદવિદો ન વેદાઃ ।
તથાપિ વેદેન વિદન્તિ વેદં
યે બ્રાહ્મણા વેદવિદો ભવન્તિ ॥ ૪૩-૫૫
ધામાંશભાગસ્ય તથા હિ વેદા
યથા ચ શાખા હિ મહીરુહસ્ય ।
સંવેદને ચૈવ યથામનન્તિ
તસ્મિન્હિ સત્યે પરમાત્મનોઽર્થે ॥ ૪૩-૫૬
અભિજાનામિ બ્રાહ્મણં વ્યાખ્યાતારં વિચક્ષણમ્ ।
યશ્છિન્નવિચિકિત્સઃ સ વ્યાચષ્ટે સર્વસંશયાન્ ॥ ૪૩-૫૭
નાસ્ય પર્યેષણં ગચ્છેત્પ્રાચીનં નોત દક્ષિણમ્ ।
નાર્વાચીનં કુતસ્તિર્યઙ્ગાદિશન્તુ કથઞ્ચન ॥ ૪૩-૫૮
તસ્ય પર્યેષણં ગચ્છેત્પ્રત્યર્થિષુ કથઞ્ચન ।
અવિચિન્વન્નિમં વેદે તપઃ પશ્યતિ તં પ્રભુમ્ ॥ ૪૩-૫૯
તૂષ્ણીંભૂત ઉપાસીત ન ચેષ્ટેન્મનસાપિ ચ ।
ઉપાવર્તસ્વ તદ્બ્રહ્મ અન્તરાત્મનિ વિશ્રુતમ્ ॥ ૪૩-૬૦
મૌનાન્ન સ મુનિર્ભવતિ નારણ્યવસનાન્મુનિઃ ।
સ્વલક્ષણં તુ યો વેદ સ મુનિઃ શ્રેષ્ઠ ઉચ્યતે ॥ ૪૩-૬૧

સર્વાર્થાનાં વ્યાકરણાદ્વૈયાકરણ ઉચ્યતે ।
તન્મૂલતો વ્યાકરણં વ્યાકરોતીતિ તત્તથા ॥ ૪૩-૬૨
પ્રત્યક્ષદર્શી લોકાનાં સર્વદર્શી ભવેન્નરઃ ।
સત્યે વૈ બ્રાહ્મણસ્તિષ્ઠંસ્તદ્વિદ્વાન્સર્વવિદ્ભવેત્ ॥ ૪૩-૬૩
ધર્માદિષુ સ્થિતોઽપ્યેવં ક્ષત્રિય બ્રહ્મ પશ્યતિ ।
વેદાનાં ચાનુપૂર્વ્યેણ એતદ્બુદ્ધ્યા બ્રવીમિ તે ॥ ૪૩-૬૪
॥ ઇતિ શ્રીમન્મહાભારતે ઉદ્યોગપર્વણિ સનત્સુજાતપર્વણિ
ત્રિચત્વારિંશોઽધ્યાયઃ ॥

## ઉદ્યોગપર્વ - અધ્યાય ૦૪૪

॥ શ્રીઃ ॥

૫.૪૪ । અધ્યાયઃ ૪૪

સનત્સુજાતેન ધૃતરાષ્ટ્રંપ્રતિ સત્ત્વોપદેશઃ ॥ ૧ ॥

ધૃતરાષ્ટ્ર ઉવાચ ।
સનત્સુજાત યામિમાં પરાં ત્વં
બ્રાહ્મીં વાચં વદસે વિશ્વરૂપામ્ ।
પરાં હિ કામેન સુદુર્લભાં કથાં
પ્રબ્રૂહિ મે વાક્યમિદં કુમાર । ૪૪-૧
સનત્સુજાત ઉવાચ ।
નૈતદ્બ્રહ્મ ત્વરમાણેન લભ્યં
યન્માં પૃચ્છન્નતિહૃષ્યસ્યતીવ ।
બુદ્ધૌ વિલીને મનસિ પ્રચિન્ત્ય
વિદ્યા હિ સા બ્રહ્મચર્યેણ લભ્યા ॥ ૪૪-૨
ધૃતરાષ્ટ્ર ઉવાચ ।
અત્યન્તવિદ્યામિતિ યત્સનાતનીં
બ્રવીષિ ત્વં બ્રહ્મચર્યેણ સિદ્ધામ્ ।
અનારભ્યાં વસતીહ કાર્યકાલે
કથં બ્રાહ્મણ્યમમૃતત્વં લભેત ॥ ૪૪-૩
સનત્સુજાત ઉવાચ ।
અવ્યક્તવિદ્યામભિધાસ્યે પરાણીં

બુદ્ધ્યા ચ તેષાં બ્રહ્મચર્યેણ સિદ્ધામ્ ।
યાં પ્રાપ્યૈનં મર્ત્યલોકં ત્યજન્તિ
યા વૈ વિદ્યા ગુરુવૃદ્ધેષુ નિત્યા ॥ ૪૪-૪
ધૃતરાષ્ટ્ર ઉવાચ ।
બ્રહ્મચર્યેણ યા વિદ્યા શક્યા વેદિતુમઞ્જસા ।
તત્કથં બ્રહ્મચર્યં સ્યાદેતદ્બ્રહ્મન્બ્રવીહિ મે ॥ ૪૪-૫
સનત્સુજાત ઉવાચ ।
આચાર્યયોનિમિહ યે પ્રવિશ્ય
ભૂત્વા ગર્ભં બ્રહ્મચર્યં ચરન્તિ ।
ઇહૈવ તે શાસ્ત્રકારા ભવન્તિ
પ્રહાય દેહં પરમં યાન્તિ યોગમ્ ॥ ૪૪-૬
અસ્મિઁલ્લોકે વૈ જયન્તીહ કામા-
ન્બ્રાહ્મીં સ્થિતિં હ્યનુતિતિક્ષમાણાઃ ।
ત આત્માનં નિર્હરન્તીહ દેહા-
ન્મુઞ્જાદિષીકામિવ સત્વસંસ્થાઃ ॥ ૪૪-૭
શરીરમેતૌ કુરુતઃ પિતા માતા ચ ભારત ।
આચાર્યશાસ્તા યા જાતિઃ સા પુણ્યા સાઽઽજરાઽમમ ૪૪-૮
યઃ પ્રાવૃણોત્યવિતથેન વર્ણા-
નૃતં કુર્વન્નમૃતં સંપ્રયચ્છમ્ ।
તં મન્યેત પિતરં માતરં ચ
તસ્મૈ ન દ્રુહ્યેત્કતમસ્ય જાનન્ ॥ ૪૪-૯
ગુરું શિષ્યો નિત્યમભિવાદયીત
સ્વાધ્યાયમિચ્છેચ્છુચિરપ્રમત્તઃ ।
માનં ન કુર્યાન્નાદધીત રોપ-
મેપ પ્રથમો બ્રહ્મચર્યસ્ય પાદઃ ॥ ૪૪-૧૦
શિષ્યવૃત્તિક્રમેણૈવ વિદ્યામાપ્નોતિ યઃ શુચિઃ ।
બ્રહ્મચર્યવ્રતસ્યાસ્ય પ્રથમઃ પાદ ઉચ્યતે ॥ ૪૪-૧૧
આચાર્યસ્ય પ્રિયં કુર્યાત્પ્રાણૈરપિ ધનૈરપિ ।
કર્મણા મનસા વાચા દ્વિતીયઃ પાદ ઉચ્યતે ॥ ૪૪-૧૨
સમા ગુરૌ યથા વૃત્તિર્ગુરુપત્ન્યાં તથા ચરેત્ ।
તત્પુત્રે ચ તથા કુર્વન્દ્વિતીયઃ પાદ ઉચ્યતે ॥ ૪૪-૧૩
આચાર્યેણાત્મકૃતં વિજાનન્

જ્ઞાત્વા ચાર્થં ભાવિતોઽસ્મીત્યનેન ।
યન્મન્યતે તં પ્રતિ હૃષ્ટબુદ્ધિઃ
સ વૈ તૃતીયો બ્રહ્મચર્યસ્ય પાદઃ ॥ ૪૪-૧૪
નાચાર્યસ્યાનપાકૃત્ય પ્રવાસં
પ્રાજ્ઞઃ કુર્વીત નૈતદહં કરોમિ ।
ઇતીવ મન્યેત ન ભાષયેત
સ વૈ ચતુર્થો બ્રહ્મચર્યસ્ય પાદઃ ॥ ૪૪-૧૫
કાલેન પાદં લભતે તથાર્થં
તતશ્ચ પાદં ગુરુયોગતશ્ચ ।
ઉત્સાહયોગેન ચ પાદમૃચ્છે-
ચ્છાસ્ત્રેણ પાદં ચ તતોઽભિયાતિ ॥ ૪૪-૧૬
ધર્માદયો દ્વાદશ યસ્ય રૂપ-
મન્યાનિ ચાઙ્ગાનિ તથા બલં ચ ।
આચાર્યયોગે ફલતીતિ ચાહુ-
ર્બ્રહ્માર્થયોગેન ચ બ્રહ્મચર્યમ્ ॥ ૪૪-૧૭
એવં પ્રવૃત્તો યદુપાલભેત વૈ
ધનમાચાર્યાય તદનુપ્રયચ્છેત્ ।
સ તાં વૃત્તિં બહુગુણામેવમેતિ
ગુરોઃ પુત્રે ભવતિ ચ વૃત્તિરેષા ॥ ૪૪-૧૮
એવં વસન્સર્વતો વર્ધતીહ
બહૂન્પુત્રાંલ્લભતે ચ પ્રતિષ્ઠામ્ ।
વર્ષન્તિ ચાસ્મૈ પ્રદિશો દિશશ્ચ
વસત્યસ્મિન્બ્રહ્મચર્યે જનાશ્ચ ॥ ૪૪-૧૯
એતેન બ્રહ્મંચર્યેણ દેવા દેવત્વમાપ્નુવન્ ।
ઋષયશ્ચ મહાભાગા બ્રહ્મલોકં મનીષિણઃ ॥ ૪૪-૨૦
ગન્ધર્વાણામનેનૈવ રૂપમપ્સરસમભૂત્ ।
એતેન બ્રહ્મચર્યેણ સૂર્યોઽપ્યહ્નાય જાયતે ॥ ૪૪-૨૧
આકાઙ્ક્ષ્યાર્થસ્ય સંયોગાદ્રસભેદાર્થિનામિવ ।
એવં હ્યેતે સમાજ્ઞાય તાદૃગ્ભાવં ગતા ઇમે ॥ ૪૪-૨૨
ય આશ્રયેત્પાવયેચ્ચાપિ રાજ-
ન્સર્વં શરીરં તપસા તપ્યમાનઃ ।
એતેન વૈ બાલ્યમભ્યેતિ વિદ્વાન્

મૃત્યું તથા સ જયત્યન્તકાલે ॥ ૪૪-૨૩
અન્તવતઃ ક્ષત્રિય તે જયન્તિ
લોકાઞ્જનાઃ કર્મણા નિર્મલેન ।
બ્રહ્મૈવ વિદ્વાંસ્તેન ચાભ્યેતિ સર્વં
નાન્યઃ પન્થા અયનાથ વિદ્યતે ॥ ૪૪-૨૪
ધૃતરાષ્ટ્ર ઉવાચ ।
આભાતિ શુક્લમિવ લોહિતમિ-
વાથો કૃષ્ણમથાઞ્જનં કાદ્રવં વા ।
સદ્બ્રહ્મણઃ પશ્યતિ યોઽત્ર વિદ્વા-
ન્કથં રૂપં તદમૃતમક્ષરં પદમ્ ॥ ૪૪-૨૫
સનત્સુજાત ઉવાચ ।
આભાતિ શુક્લમિવ લોહિતમિ-
વાથો કૃષ્ણમાયસમર્કવર્ણમ્ ।
ન પૃથિવ્યાં તિષ્ઠતિ નાન્તરિક્ષે
નૈતત્સમુદ્રે સલિલં બિભર્તિ ॥ ૪૪-૨૬
ન તારકાસુ ન ચ વિદ્યુદાશ્રિતં
ન ચાભ્રેષુ દૃશ્યતે રૂપમસ્ય ।
ન ચાપિ વાયૌ ન ચ દેવતાસુ
નૈતચ્ચન્દ્રે દૃશ્યતે નોત સૂર્યે ॥ ૪૪-૨૭
નૈવર્ક્ષુ તન્ન યજુષ્ષુ નાપ્યથર્વસુ
ન દૃશ્યતે વૈ વિમલેષુ સામસુ ।
રથન્તરે બાર્હદ્રથે વાપિ રાજ-
ન્મહાવ્રતે નૈવ દૃશ્યેદ્ધ્રુવં તત્ ॥ ૪૪-૨૮
અપારણીયં તમસઃ પરસ્તા-
ત્તદન્તકોઽપ્યેતિ વિનાશકાલે ।
અણીયો રૂપં ક્ષુરધારયા સમં
મહચ્ચ રૂપં તદ્વૈ પર્વતેભ્યઃ ॥ ૪૪-૨૯
સા પ્રતિષ્ઠા તદમૃતં લોકાસ્તદ્બ્રહ્મ તદ્યશઃ ।
ભૂતાનિ જજ્ઞિરે તસ્માત્પ્રલયં યાન્તિ તત્ર હિ ॥ ૪૪-૩૦
અનામયં તન્મહદુદ્યતં યશો
વાચો વિકારં કવયો વદન્તિ ।
યસ્મિઞ્જગત્સર્વમિદં પ્રતિષ્ઠિતં

યે તદ્વિદુરમૃતાસ્તે ભવન્તિ ॥ ૪૪-૩૧
‘ તદેતદહ્ના સંસ્થિતં ભાતિ સર્વં
તદાત્મવિત્પશ્યતિ જ્ઞાનયોગાત્ ।
તસ્મિઞ્જગત્સર્વમિદં પ્રતિષ્ઠિતં
યે તદ્વિદુરમૃતાસ્તે ભવન્તિ ॥’ ॥ ૪૪-૩૨

ઇતિ શ્રીમન્મહાભારતે ઉદ્યોગપર્વણિ સનત્સુજાતપર્વણિ
ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥

sઈચ્તિઓન્ઉદ્યોગપર્વ - અધ્યાય ૦૪૫
॥ શ્રીઃ ॥

પ.૪૫ । અધ્યાયઃ ૪૫

સનત્સુજાતેન ધૃતરાષ્ટ્રંપ્રતિ તત્વોપદેશઃ ॥ ૧ ॥

સનત્સુજાત ઉવાચ ।
શોકઃ ક્રોધશ્ચ લોભશ્ચ કામો માનઃ પરાસુતા ।
ઈર્ષ્યા મોહો વિવિત્સા ચ કૃપાઽસૂયા જુગુપ્સુતા ॥ ૪૫-૧
દ્વાદશૈતે મહાદોષા મનુષ્યપ્રાણનાશનાઃ ।
એકૈકમેતે રાજેન્દ્ર મનુષ્યાન્પર્યુપાસતે ।
યૈરાવિષ્ટો નરઃ પાપં મૂઢસંજ્ઞો વ્યવસ્યતિ ॥ ૪૫-૨
સ્પૃહયાલુરુગ્રઃ પરુષો વા વદાન્યઃ
ક્રોધં બિભ્રન્મનસા વૈ વિકત્થી ।
નૃશંસધર્માઃ ષડિમે જના વૈ
પ્રાપ્યાપ્યર્થં નોત સભાજયન્તે ॥ ૪૫-૩
સંભોગસંવિદ્વિષમોઽતિમાની
દત્ત્વા વિકત્થી કૃપણો દુર્બલશ્ચ ।
બહુપ્રશંકસી વનિતાદ્વિટ્ સદૈવ
સપ્તૈવોક્તાઃ પાપશીલા નૃશંસાઃ ॥ ૪૫-૪
ધર્મશ્ચ સત્યં ચ તપો દમશ્ચ
અમાત્સર્યં હ્રીસ્તિતિક્ષાનસૂયા ।
દાનં શ્રુતં ચૈવ ધૃતિઃ ક્ષમા ચ
મહાવ્રતા દ્વાદશ બ્રાહ્મણસ્ય ॥ ૪૫-૫
યો નૈતેભ્યઃ પ્રચ્યવેદ્દ્વાદશભ્યઃ

સર્વામપીમાં પૃથિવીં સ શિષ્યાત્ ।
ત્રિભિર્દ્વાભ્યામેકતો વાર્થિતો યો
નાસ્ય સ્વમસ્તીતિ ચ વેદિતવ્યમ્ ॥ ૪૫-૬
દમસ્ત્યાગોઽથાપ્રમાદ ઇત્યેતેષ્વમૃતં સ્થિતમ્ ।
એતાનિ બ્રહ્મમુખ્યાનાં બ્રાહ્મણાનાં મનીષિણામ્ ॥ ૪૫-૭
સદ્વાઽસદ્વા પરીવાદે બ્રાહ્મણસ્ય ન શસ્યતે ।
નરકપ્રતિષ્ઠાસ્તે સ્યુર્ય એવં કુરુતે જનાઃ ॥ ૪૫-૮
મદોઽષ્ટાદશદોષઃ સ સ્યાત્પુરા યોઽપ્રકીર્તિતઃ ।
લોકદ્વેષ્યં પ્રતિકૂલ્યમભ્યસૂયા મૃષાવચઃ ॥ ૪૫-૯
કામક્રોધૌ પારતન્ત્ર્યં પરિવાદોઽથ પૈશુનમ્ ।
અર્થહાનિર્વિવાદશ્ચ માત્સર્યં પ્રાણિપીડનમ્ ॥ ૪૫-૧૦
ઈર્ષ્યા મોદોઽતિવાદશ્ચ સંજ્ઞાનાશોઽભ્યસૂયિતા ।
તસ્માત્પ્રાજ્ઞો ન માદ્યેત સદા હ્યેતદ્વિગર્હિતમ્ ॥ ૪૫-૧૧
સૌહૃદે વૈ ષડ્ગુણા વેદિતવ્યઃ
પ્રિયે હૃષ્યન્ત્યપ્રિયે ચ વ્યથન્તે ।
સ્યાદાત્મનઃ સુચિરં યાચતે યો
દદાત્યયાચ્યમપિ દેયં ખલુ સ્યાત્ ।
ઇષ્ટાન્પુત્રાન્વિભવાન્સ્વાંશ્ચ દારા-
નભ્યર્થિતશ્ચાર્હતિ શુદ્ધભાવઃ ॥ ૪૫-૧૨
ત્યક્તદ્રવ્યઃ સંવસેન્નેહ કામા-
દ્ભિઙ્ક્તે કર્મસ્વાશિષં બાધતે ચ ॥ ૪૫-૧૩
દ્રવ્યવાન્ગુણવાનેવં ત્યાગી ભવતિ સાત્વિકઃ ।
પઞ્ચભૂતાનિ પઞ્ચભ્યો નિવર્તયતિ તાદૃશઃ ॥ ૪૫-૧૪
એતત્સમૃદ્ધમપ્યૃદ્ધં તપો ભવતિ કેવલમ્ ।
સત્વાત્પ્રચ્યવમાનાનાં સઙ્કલ્પેન સમાહિતમ્ ॥ ૪૫-૧૫
યતો યજ્ઞઃ પ્રવર્ધન્તે મત્યસ્યૈવાવરોધનાત્ ।
મનસાન્યસ્ય ભવતિ વાચ્યન્યસ્યાથ કર્મણા ॥ ૪૫-૧૬
સઙ્કલ્પસિદ્ધં પુરુષમસઙ્કલ્પોઽધિતિષ્ઠતિ ।
બ્રાહ્મણસ્ય વિશેષેણ કિઞ્ચાન્યદપિ મે શ્રૃણુ ॥ ૪૫-૧૭
અધ્યાપયેન્મહદેતદ્યશસ્યં
વાચો વિકરાઃ કવયો વદન્તિ ।
અસ્મિન્યોગે સર્વમિદં પ્રતિષ્ઠિતં

યે તદ્વિદુરમૃતાસ્તે ભવન્તિ ॥ ૪૫-૧૮
ન કર્મણા સુકૃતેનૈવ રાજન્
સત્યં જયેજ્જુહુયાદ્વા યજેદ્વા ।
નૈતેન વાલોઽમૃત્યુમભ્યેતિ રાજન્
રતિં ચાસૌ ન લભત્યન્તકાલે ॥ ૪૫-૧૯
તૂષ્ણીમેક ઉપાસીત ચેષ્ટેત મનસાપિ ન ।
તથા સંસ્તુતિનિન્દાભ્યાં પ્રીતિરોષૌ વિવર્જયેત્ ॥ ૪૫-૨૦
અત્રૈવ તિષ્ઠન્ક્ષત્રિય બ્રહ્માવિશતિ પશ્યતિ ।
વેદેષુ ચાનુપૂર્વ્યેણ એતદ્વિદ્વન્બ્રવીમિ તે ॥ ૪૫-૨૧

ઇતિ શ્રીમન્મહાભારતે ઉદ્યોગપર્વણિ સનત્સુજાતપર્વણિ
પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥

## ઉદ્યોગપર્વ - અધ્યાય ૦૪૬

॥ શ્રીઃ ॥

૫.૪૬ । અધ્યાયઃ ૪૬

સનત્સુજાતેન ધૃતરાષ્ટ્રંપ્રતિ તત્વોપદેશઃ ॥ ૧ ॥

સનત્સુજાત ઉવાચ ।
યત્તચ્છુક્રં મહજ્જ્યોતિર્દીપ્યમાનં મહદ્યશઃ ।
તદ્વૈ દેવા ઉપાસતે તસ્માત્સૂર્યો વિરાજતે ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧
શુક્રાદ્બ્રહ્મ પ્રભવતિ બ્રહ્મ શુક્રેણ વર્ધતે ।
તચ્છુકં જ્યોતિષાં મધ્યેઽતમં તપતિ તાપનમ્ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૨
આપોઽથાદ્ભ્યઃ સલિલસ્ય મધ્યે
ઉભૌ દેવૌ શિશ્રિયાતેઽન્તરિક્ષે ।
અતન્દ્રિતઃ સવિતુર્વિવસ્વા-
નુભૌ બિભર્તિ પૃથિવીં દિવં ચ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૩
ઉભૌ ચ દેવૌ પૃથિવીં દિવં ચ

દિશઃ શુક્રો ભુવનં બિભર્તિ ।
તસ્માદ્દિશઃ સરિતશ્ચ સ્રવન્તિ
તસ્માત્સમુદ્રા વિહિતા મહાન્તાઃ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૪
ચક્રે રથસ્ય તિષ્ઠન્તોઽધ્રુવસ્યાવ્યયકર્મણઃ ।
કેતુમન્તં વહન્ત્યશ્વાસ્તં દિવ્યમજરં દિવિ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૫
ન સાદૃશ્યે તિષ્ઠતિ રૂપમસ્ય
ન ચક્ષુપા પશ્યતિ કશ્ચિદેનમ્ ।
મનીષયાથો મનસા હૃદા ચ
ય એનં વિદુરમૃતાસ્તે ભવન્તિ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૬
દ્વાદશપૂગાં સરિતં પિબન્તો દેવરક્ષિતામ્ ।
મધ્વીક્ષન્તશ્ચ તે તસ્યાઃ સંચરન્તીહ ઘોરામ્ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૭
તદર્ધમાસં પિબતિ સંચિતં ભ્રમરો મધુ ।
ઈશાનઃ સર્વભૂતેષુ હવિર્ભૂતમકલ્પયત્ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૮
હિરણ્યપર્ણમશ્વત્થમભિપદ્ય હ્યપક્ષકાઃ ।
તે તત્ર પક્ષિણો ભૂત્વા પ્રપતન્તિ યથાદિશમ્ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૯
પૂર્ણાત્પૂર્ણાન્યુદ્ધરન્તિ પૂર્ણાત્પૂર્ણાનિ ચક્રિરે ।
હરન્તિ પૂર્ણાત્પૂર્ણાનિ પૂર્ણમેવાવશિષ્યતે ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૦
તસ્માદ્વૈ વાયુરાયાતસ્તસ્મિંશ્ચ પ્રયતઃ સદા ।
તસ્માદગ્નિશ્ચ સોમશ્ચ તસ્મિંશ્ચ પ્રાણ આતતઃ ॥ ૪૬-૧૧
સર્વમેવ તતો વિદ્યાત્તત્તદ્વક્તું ન શક્નુમઃ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૨
અપાનં ગિરપિ પ્રાણઃ પ્રાણં ગિરતિ ચન્દ્રમાઃ ।
આદિત્યો ગિરતે ચન્દ્રમાદિત્યં ગિરતે પરઃ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૩

એકં પાદં નોત્ક્ષિપતિ સલિલાદ્ધંસ ઉચ્ચરન્ ।
તં ચેત્સન્તતમૂર્ધ્વાય ન મૃત્યુર્નામૃતં ભવેત્ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૪
અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽન્તરાત્મા
લિઙ્ગસ્ય યોગેન સ યાતિ નિત્યમ્ ।
તમીશમીડ્યમનુકલ્પમાદ્યં
પશ્યન્તિ મૂઢા ન વિરાજમાનમ્ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૫
અસાધના વાપિ સસાધના વા
સમાનમેતદ્દૃશ્યતે માનુષેષુ ।
સમાનમેતદમૃતસ્યેતરસ્ય
મુક્તાસ્તત્ર મધ્વ ઉત્સં સમાપુઃ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૬
ઉભૌ લોકૌ વિદ્યયા વ્યાપ્ય યાતિ
તદા હુતં ચાહુતમગ્નિહોત્રમ્ ।
મા તે બ્રાહ્મી લઘુતામાદધીત
પ્રજ્ઞાનં સ્યાન્નામ ધીરા લભન્તે ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૭
એવંરૂપો મહાત્મા સ પાવકં પુરુષો ગિરન્ ।
યો વૈ તં પુરુષં વેદ તસ્યેહાર્થો ન રિષ્યતે ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૮
યઃ સહસ્રં સહસ્રાણાં પક્ષાન્સંતત્ય સંપતેત્ ।
મધ્યમે મધ્ય આગચ્છેદપિચેત્સ્યાન્મનોજવઃ ।
યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૧૯
ન દર્શને તિષ્ઠતિ રૂપમસ્ય
પશ્યન્તિ ચૈનં સુવિશુદ્ધસત્વાઃ ।
હિતો મનીષી મનસા ન તપ્યતે
યે પ્રવ્રજેયુરમૃતાસ્તે ભવન્તિ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૨૦
ગૂહન્તિ સર્પા ઇવ ગહ્વરાણિ

સ્વશિક્ષયા સ્વેન વૃત્તેન મર્ત્યાઃ ।
તેષુ પ્રમુહ્યન્તિ જના વિમૂઢા
યથાધ્વાનં મોહયન્તે ભયાય ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૨૧
નાહં સદાઽસત્કૃતઃ સ્યાં ન મૃત્યુ-
ર્ન ચામૃત્યુરમૃતં મે કુતઃ સ્યાત્ ।
સત્યાનૃતે સત્યસમાનબન્ધે
સતશ્ચ યોનિરતસતશ્ચૈક એવ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૨૨
ન સાધુના નોત અસાધુના વા-
ઽસમાનમેતદ્દૃશ્યતે માનુષેષુ ।
સમાનમેતદમૃતસ્ય વિદ્યા-
દેવં યુક્તો મધુ તદ્વૈ પરીપ્સેત્ ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૨૩
નાસ્યાતિવાદા હૃદયં તાપયન્તિ
નાનધીતં નાહુતમગ્નિહોત્રમ્ ।
મનો બ્રાહ્મી લઘુતામાદધીત
પ્રજ્ઞાં ચાસ્મૈ નામ ધીરા લભન્તે ॥

યોગિનસ્તં પ્રપશ્યન્તિ ભગવન્તં સનાતનમ્ ॥ ૪૬-૨૪
એવં યઃ સર્વભૂતેષુ આત્માનમનુપશ્યતિ ।
અન્યત્રાન્યત્ર યુક્તેષુ કિં સ શોચેત્તતઃ પરમ્ । ૪૬-૨૫
યથોદપાને મહતિ સર્વતઃ સંપ્લુતોદકે ।
એવં સર્વેષુ વેદેષુ આત્માનમનુજાનતઃ ॥ ૪૬-૨૬
અઙ્ગુષ્ઠમાત્રઃ પુરુષો મહાત્મા
ન દૃશ્યતેઽસૌ હૃદિ સંનિવિષ્ટઃ ।
અજશ્ચરો દિવારાત્રમતન્દ્રિતશ્ચ
સ તં મત્વા કવિરાસ્તે પ્રસન્નઃ ॥ ૪૬-૨૭
અહમેવ સ્મૃતો માતા પિતા પુત્રોઽસ્મ્યહં પુનઃ ।
આત્માહમપિ સર્વસ્ય યચ્ચ નાસ્તિ યદસ્તિ ચ ॥ ૪૬-૨૮
પિતામહોઽસ્મિ સ્થવિરઃ પિતા પુત્રશ્ચ ભારત ।

મમૈવ યૂયમાત્મસ્થા ન મે યૂયં ન વો હ્યહમ્ ॥ ૪૬-૨૯
આત્મૈવ સ્થાનં મમ જન્મ ચાત્મા
ઓતપ્રોતોઽહમજરપ્રતિષ્ઠઃ ।
અજશ્ચરો દિવારાત્રમતન્દ્રિતોઽહં
માં વિજ્ઞાય કવિરાસ્તે પ્રસન્નઃ ॥ ૪૬-૩૦
અણોરણીયાન્સુમનાઃ સર્વભૂતેષુ જાગ્રતિ ।
પિતરં સર્વભૂતેષુ પુષ્કરે નિહિતં વિદુઃ ॥ ૪૬-૩૧

ઇતિ શ્રીમન્મહાભારતે ઉદ્યગપર્વણિ સનત્સુદજાતપર્વણિ
ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ સમાપ્તમિદં સનત્સુજાતપર્વ ॥

*sanatsujAtIyam*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*